प्रतिक - ग्रं.नं ९२५

पद्धति:

# संस्कृत

१ उत्सर्गविधि प ५ (अपूर्ण

३७५२

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.
" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

उत्सर्गपद्धति·

(4)

श्रीकाशीजीमे आदि विश्वेश्वरकेपासमहल्लाघुघुरानासामाकीगलीश्रीयुतवा
बूहरखचंदजीकेवाडेमेदुर्गाप्रसादकटारेकेगणेशयंत्रालयमेउत्सर्गपद्धतिछापीग
यी लिखारामदास छापनेवालाघुरविनजिसेलेनाहोयउसेचाननीचोकमेकुंजग
लीकेपच्छिमफाटककेपासदुर्गाप्रसादकटारेकेदुकानपरमिलेगी ॥ २ ॥ ६ ॥

(2)

उत्स- ॐश्रीगणेशायनमः ॥ अथतडागोत्सर्गपद्धतीलिख्यते ॥ उत्तरायणे कार्त्तिकमाघफाल्गुणचैत्रवैशाखज्येष्ठआषा
प० ढश्रावणाश्विनपौषेषु यजमानस्यरविशुद्धौवहुजलसत्वेषुशुक्लपक्षे द्वितीयातृतीयापंचमीसप्तमीदशमीत्र।
१ योदशीपौर्णमासीषु वुधगुरुशुक्रवारेषु रविसोमयोरप्येके भरणीकृत्तिकार्द्रापुनर्वस्वश्लेषापूर्वाफाल्गुनीविशाखा
व्यतिरिक्तनक्षत्रेषु क्रूरग्रहवर्जितेषु विष्कुंभगंडातिगंडशूलव्याघातहर्षणवज्रव्यतीपातपरिघसाध्यवैधृतिव्यति
रिक्तयोगेषु विष्टिव्यतिरिक्तकरणेषु मेषसिंहधनुर्वृश्चिकातिरिक्तेलग्नेवुधगुरुसितनिरीक्षितेचंद्रतारानुकूले आ।
वालवृद्धनास्तमितगुरुशुक्रे असिंहमकरस्थावक्रानातिचारीगुरौमलमासक्षयमासलुप्तवर्षाद्भुतावमादिदोषर
हिते ज्योतिर्विद्विप्रकथितेकालेजलाशयोत्सर्गंकुर्यात अथमंडपकरणं चतुर्विंशांगुलोहस्तः समपदस्य प्रपद
मालेव्योच्छ्रितस्यवाकर्तुः ऊर्द्धवाहोः पंचमांशोहस्तास्तस्यचतुर्विंशांशोंगुलं अंगुष्ठाष्टमांशोयवद्दशद्वादशालयोद्वा
दशाचतुर्दशमध्यमो षोडशाष्टदशावुत्तमो हस्तमितिः समचतुरस्त्रावेदिःकार्या" तत्रषोडशस्तंभाः परितोद्वाद
शमध्येवेदींचतुरस्त्रावेदिकाकार्याचतुर्हस्तप्रमाणामध्येस्तंभचतुष्टयंकृत्वा अष्टहस्तोच्छ्रायाः उपरिवलिकाका राम
ष्ठयोजनसच्छिद्राःकार्याः द्वादशान्तेसर्वेनिश्छिद्राःऋजवःशुभाःकार्याः स्तंभोच्छ्रायंपंचधाविभज्यपंचमांशंभुवि। १

(2A)

निखनेत् क्षेत्रस्य नवधा विभज्य तृतीयांशपरिमितमंतरालं विहाय स्तंभा निवेशनीयाः परितो द्वाराणि कनिष्ठेहि
करं द्वास्व चतुरंगुलवृद्धितः मध्यमोत्तमयोरिति ततः परितो द्वारशाखाः प्रतिदिशं पूर्वादि अश्वत्थोदुंबरप्लक्षन्यग्रो
धादिना चतुर्णां शाखाभिः क्रमादधममध्यमोत्तमादिमंडपेषु पंचषट्सप्तहस्तोच्चाभिर्द्वाभ्यां द्वाभ्यां प्रतिदिशं तो
रणानि कुर्यात् ततः कुंडानि ते च वेदिभिस्तोः परित्यज्य त्रयोदशभिरंगुलैः कुर्यात् कुंडानि चत्वारि चतुर्दिक्षु यथाक्रमं
आचार्यकुंडं पूर्वेशयोर्मध्ये कार्यं हस्तमात्रं त्रिमेखला कार्या एकाचार्यपक्षे एकं कुंडं जघन्यः पक्षः योनिवक्रकंठयु
क्तं कार्यं कुंडं पंचदशांगुलं निम्नं उपरि मात्रांगुलं एकांगुलः परितः कंठः तस्योपरि त्रिमेखलाः कार्या पूर्वमेव भू
मिप्रार्थना शुभेन्हि मंडपं कर्तुं यथोचितं मार्जनदहनखननादिना स्मृत्युक्तेन भूमिं संशोध्य समकरणीं कुर्यात् ततो
द्वादशांगुलशंकुमानेन कृते मंडले शंकुप्रवेशनिर्गमाभ्यां प्राचीं साध्या पुण्येन्हि पूर्वान्हे गणेशं कूर्मं शेषं वसुधां
द्विजांश्चंदनादिना प्रपूज्य भूम्यै अर्घ्यं दत्वा मंडपादि कुर्यात् तद्यथा देशकालौ स्मृत्वा जलाशयोत्सर्गयज्ञोपयोगी
मंडपकुंडादिकर्तुं गणपतिकूर्मशेषवसुधाद्विजान् पूज्य अर्घदानानि करिष्ये ताम्रपात्रे गंधदूर्वाफलपुष्पयवयु
तजलं गृहीत्वा शुक्लवासाः शुचिर्भूत्वा अर्घ्यहस्त उदङ्मुखः कृतांजलिपुटो भूत्वा भूमिमावाहयेत् ततः आगच्छ।

(3)

उत्स· सर्वकल्याणिवसुधेलोकधारिणि उद्धृतासिवराहेणसशैलवनकानना ॥ १॥ मंडपंकारयाम्यत्रत्वद्दूर्ध्वंशुभ
प० लक्षणं गृहाणार्घ्यंमयादत्तंप्रसन्ना सर्वदा भवेदेवमर्घ्यंदत्वाबद्धांजलिः स्थानाय० भूमिंप्रार्थ्य० जलाश
२ यास्याग्निमेशानपूर्वोत्तराणामन्यतमेवादेशेजलाशयसमीपेषोडशहस्तमितंसमचतुरस्रंचतुर्द्वारंमंडपंकुर्या
त् ॥ तद्यथा ॥ निस्यक्रियः कुशपाणिः कुशासनेप्राङ्मुखउपविश्य अंतर्जानुराचम्यप्राणानायम्यसकुशंजल
मादाय सुमुखश्चेत्यादि देशकालौसंकीर्त्यश्वः कर्त्तव्यामुकजलाशयोत्सर्गयज्ञाविघ्नपरिसमाप्तिकामोविनायकंस्क
योदिग्रहांश्चपूजयिष्ये ॥ इतिसंकल्प्य० प्रतिमायामक्षतपुंजेषुवाभूर्भुवस्वर्विनायकायनमइतिमंत्रेण गणानांत्वे
ति वैदिकेनवापूजयेत् भूर्भुवस्वर्गौर्यैनमइति० श्रीश्चतेतिमंत्रेणगौरींपूजयेत् शूद्राणांतु० हेदेवरंवत्समेह्येहिअं
बिकात्मंबकात्मज सिद्धिबुद्धिपतेत्र्यक्षलक्षलाभः पितुः पिता नागास्यनागहारत्वंगणराजचतुर्भुज भूषितः स्वा
युधैर्दिव्यैः पाशांकुशपरश्वधैः आवाहयामिपूजार्थंरक्षार्थंचममक्रतोः इहागत्यगृहाणत्वंपूजांकर्तुंचरक्षमे आ राम·
वाह्येवंगणेशंतंपूजाद्रव्यैःप्रपूजयेत् नारिकेलेनदेयोर्घ्यः रक्षरक्षगणाध्यक्षरक्षत्रैलोक्यरक्षक भक्तानाममभयंकर्त्ता॥ २

The Rajawade Sanshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan Mumbai Joint project

(3A)

त्राताभवभवार्णवात् हेमातुरकृपासिंधोषाण्मातुराग्रजप्रभो वरदस्त्वंवरंदेहिवांछितंवांछितार्थद गृहाणार्घ्यमिदंदे।
वसर्वेदेवनमस्कृत अनेनफलदानेनफलदोस्तुसदामम अथप्रार्थना विघ्नेश्वरायवरदायसुरप्रियायलंबोदरायसकलायज
गद्धिताय नागाननायश्रुतियज्ञविभूषितायगौरीसुतायगणनाथनमोनमस्ते भक्तार्तिनाशनपराय गणेश्वरायसर्वे
श्वरायसुखदायसुरप्रियाय विद्याधरायविकटायचवामनायभक्तप्रसन्नवरदायनमोनमस्ते नमस्तेब्रह्मरूपाय
—विष्णुरूपायतेनमः ॥४॥ ४॥ ४॥ ४॥ ४॥ ४॥ ४॥ ४॥ ४॥ ४॥ ४॥ ४॥ ४॥ ४॥ नमस्तेरुद्ररूपाय करि।
रूपायतेनमः विश्वरूपस्वरूपायनमस्तेब्रह्मचारिणे भक्तप्रियायदेवायनमस्तुभ्यंविनायकं लंबोदरनमस्तुभ्यंसततं
मोदकप्रिय· निर्विघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा जयंतीमंगलाकालीतिगौरींप्रार्थयेत् पुनर्देशकालौसंकीर्त्यसर्व
पापक्षयपूर्वकरुद्रालयागमनानेककल्पव्यापिस्वर्गलोकहर्षपरार्द्धद्व्यावच्छिन्नमहत्तपः प्रभृतिलोकांगनासहि।
तितज्जलाशयस्थतोयबिंदुसमसंख्यदेवसारूप्यतद्भुद्धिवर्जितत्वचातुरंगचतुर्वर्णैश्वर्यादानजन्यकामोवाअमु।
कजलाशयोत्सर्गेयस्येयज्ञेनाहमहंकरिष्ये इतिसंकल्प्यततोवरुणमदीक्षादंपत्योर्वस्त्रेरक्तसूत्रबंधः काण्डात्का।
ण्डादितिदूर्वामार्जनम् अश्वक्रान्तमितिस्नानवंदनं दधिक्राव्णेतिदधिवंदनं करोतुस्वस्ति तेब्रह्मास्वस्तिचापिद्विजा

(५)

उत्स· तयः सरीसृपाश्चयेश्रेष्टास्तेभ्यस्तेस्वस्तिसर्वदा ययातिनहुषश्चैवधुंधमारोभगीरथः तुभ्यराजर्षयःसर्वेस्वस्तिकुर्वंतुसर्वदा
प० स्वतिनेस्तद्विपादेभ्य श्चतुष्पादेभ्यएवच स्वस्त्यस्त्वपादकेभ्यश्चनिस्यंतवमहामखे इसस्ततान्याज्य हस्तेदत्त्वात्वंदीक्षि
३ तोसीसुश्रूक्ता ग्रतेनदीक्षा इतिमंत्रेणयाज्याभिमंत्रणं ततोयाज्यो ऽमुकजलाशयोत्सर्गकंतुत्वणतोरणमातृपूजनसगण
पतिगौर्यादिषोडशमातृकापूजनंचकरिष्ये नंदे नंदिनिवासिष्टेवसुदेवेचभार्गवेजयेचविजयेचैवसप्तैतास्तरणमा
मातरः त्वणा·रः इहागच्छइहातिष्ठपूजयेत् नंदायैनमः नंदिन्यै·वासिष्ठायैनमः वसुदेव्यै·भार्गव्यै· नजयायैन·वि
जयायै· इतिप्रत्येकंपूजयेत् अनेनपूजनेनतृणमातरःप्रीयंतांनमम· द्वारमातृःकुमारि धनदानंदा·मंगलाचक
लिप्रिया रौद्राचस्रुभगाचैवसप्तैताद्वारमातरः गौरीपद्माशचीमेधासावित्री विजयाजया· देवसेनास्वधास्वा।
हामातरोलोकमातरः हृष्टिःपुष्टिस्तथातुष्टिरात्मदेवतयासह गणेशेनाधिकाह्येतापूजनीपास्तुषोडश ब्राह्मी
माहेश्वरीचैवकौमारीवैष्णवीतथा वाराहीचतथेंद्राणिचामुंडासप्तमातरः ततोवसोर्द्धाराः॥वसोःपवित्रमसिशत
धारं·धुस्सःतिस्रपंचसप्तघृतधाराः कुर्यात् ततोनांदीश्राद्धंकुर्यात् पुण्याहवाचनंकुर्यात् ततोयाज्योदेशकालौ। एम·
स्मृत्वाजलाशयोत्सर्गकर्तुआचार्यायऋत्विक्द्वारपालानांवरणंमधुपर्केणार्चनंचकरिष्ये तद्यथा पूर्वेमुखोयज। ३

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

मानः अमुकगोत्रोऽमुकप्रवरान्वितोमुकनामायजमानः जलाशयोत्सर्गकर्मणिउदङ्मुखंअमुकगोत्रममुकप्रव
रममुकनामाननमुकशाखाध्यायिनंहेमकुंडलद्वयकेयूरद्वय टक द्वयकंठाभरणांगुलीयकवस्त्रयुग्मरूपा
लंकरणाह्निगुणासुवर्णघरितमलं कारयुक्तंगुणवंतंत्वांआचार्यत्वेनवृणोवृतोस्मितत्रमेत्वमाद्याचार्योभवेतिबद्धां
ज्जलिःप्रार्थ्य भवामितितेनोक्तेत्वन्नोगुरुः पितामातात्वंप्रभुस्त्वंपरायणं त्वत्प्रसादाच्चविप्रर्षेसर्वंममम नोगतं
आचार्यस्त्वंयथास्वर्गेशक्रादिनां॰ तथैवब्रह्मवरणां॰ यथाचतुर्मुखोब्रह्मा॰ तथैवऋत्विजांवर्णनं कार्यं॰ प्राक्कुंडे
ऋग्वेदिनौ॰ऋग्वेदःपद्मपत्राक्षोगायत्रःशक्रदैवतः।अत्रिगोत्रस्त्वविप्रेंद्रऋत्विक्त्वंमेमखेभव।याम्यकुंडेयजुर्वेदिनौकातरा
क्षीयंजुर्वेद स्त्रिष्टुभोविष्णुदैवतः॥काश्यपेयस्त्वविप्रेंद्रऋत्विकत्वं॰ सानगोमत्यकुंडे सामवेदस्तुपिंगाक्षोजा।
गतःशक्रदैवतः भारद्वाजस्त्वविप्रेंद्रऋ॰ अथर्वाणोउदक॰ दहन्मोत्रोथर्ववेदोनुष्टुभोरुद्रदैवतः वैशंपायनविप्रेंद्र
ऋ॰ ततोष्टौचतुरोवाद्वारपालानवृणुयात् भद्रंकर्णेभिरितिमंडपंप्रदक्षिणीकृत्यपश्चिमद्वारेणमंडपंप्रविश्य ॥
आचम्यदेशकालौसंकीर्त्यश्वःकरिष्यमाणजलाशयोत्सर्गयज्ञांगत्तयागणेशपूजापूर्वकमंडपदेवतास्थापनादिच
करिष्ये गौरसर्षपान्सर्वतोमंडपांतरविकिरेद्रक्षोघ्नमंत्रेण यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वदा स्थानंत्य।

Joint project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

उत्स॰ त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु १ अपक्रामंतु भूतानि पिशाचाः सर्वतो दिशं सर्वेषामविरोधेन यज्ञकर्म समारभेत् ततः
प॰ कुशैः पंचगव्येन सर्वत्र प्रोक्षेदापो हि ष्ठेति त्र्यृचेन ततः कृतांजलिः स्वस्त्ययनं॰ स्वस्ति न॰ मंत्रद्वयं पठेत् तत एकैकवे
४ दिनौ द्वौ द्वौ जापकौ पूर्वादिदिशि॰ एवमेव जापकत्वेन त्वामहं वृणे अष्टौ जापकान् पूर्वावद्वृणुयात् ततोऽष्टौ द्वारपाला
न् पूर्वादिदिशि द्वौ द्वौ द्वारपालत्वेन त्वामहं वृणे एवमेवं पंचविंशतिऋत्विजो भवंति अत्राशक्तौ अष्टौ होतारश्चत्वारो जाप
काश्चत्वारो द्वारपाला गुरुश्चेति सप्तदश अत्राप्यशक्तौ चत्वारो होतारश्चत्वारो जापकान् चतुरो द्वारपालान् गुरुं चेति त्र
योदश अत्राप्यसामर्थ्ये एकाग्निविधिना कर्म कर्तुमाचार्यब्रह्माणौ च [illegible] तदाशास्त्वांतरस्थं मंत्रहोमो जापकद्वारपालक
र्म निवर्तते कर्त्रभावात् ततो गुर्वादींस्तदीयपरंपरागतशाखीयगृह्योक्तविधिना वरणक्रमेण मधुपर्केणार्चयेत् स
चना नानारूपत्वादत्र न लिख्यते तदनंतरं उक्तरीत्या कृते मंडपमध्ये उपयुक्तवस्तून्युपकल्पयेत् तद्यथा स्रुक्स्रुवादीनि
यागोपकरणानि वारुणहोमार्थं प्रादेशमिता अष्टोत्तरसंख्या औदुंबर्यः समिधः ग्रहहोमार्थं अश्वत्थपलाशखदिरा
पामार्गपिप्पलोदुंबरशमीदूर्वाकुशमय्यः। प्रत्येकमष्टाविंशतिसंख्याकाः समिधः अधिदेवताप्रत्यधिदेवतानवकविनायकादियं चें
द्रादिलोकपालदशकं विश्वकर्महोमार्थं प्रत्येकमष्टाविंशतिसंख्याकाः। पालाशाः समिधः प्रादेशमिता एतावद्देवताहो ४

(5A)

मपर्याप्तमाज्यंहोमसामग्रिं कुंडपंचकेहोतुः पंचगुणांसंपादयेत्· यजुर्वेदिब्रह्मादक्षिणार्थंपूर्णपात्रस्थितानंतंडुलान्
अष्टमुष्टिर्भवेत्किंचित्किंचिदष्टौतुपुष्कलं पुष्कलानितुचत्वारिपूर्णपात्रंतदुच्यते तथाचशतद्वयंषट् पंचाशन्मुष्टय
स्तंडुलानांपूर्णपात्रंभवति अत्राशक्तस्ययावतावहुभोक्तुस्तृप्तिःपूर्णाजायते नावराध्यमतःकुर्यात् पूर्णपात्रमिति।
स्थितिः छंदोगपरिशिष्टोक्तं ग्रहाधिदेवतादिपूजार्थंनानाविधगंधपुष्पधूपदीपवस्त्रग्रंथिताग्रथितपुष्पाणिसंपाद
येत् भूरिभक्ष्याणिचनैवेद्यार्थंगुडौदनादिनवग्रहवल्यर्थंपायसंवाअधिदेवतादिवल्यर्थंसर्वार्थंवापायसमेवदि
क्पालादिवल्यर्थंमाषभक्तंचचतुर्हस्तवेद्युपरिदेयंपंचवर्णवितानकं ग्रहादिस्थापनार्थंचनानावर्णाश्चतंडुलान्:
यजमानारत्नित्रयमितंयजमानप्रमाणं वाश्वत्थादिक्षीरवृक्षीयम् अष्टास्रमुपरिवर्तुलंमध्येसंततमृजुंवायूपंसं
पादयेत् शक्तिसुवर्णनिर्मितंसपंचरत्नसुवर्णपात्र्यांसौवर्णौकूर्ममकरौराजितौमत्स्यडुंडुभौताम्रमयौकुलीरमंडू
कौलोहंचशिशुमारकं आसादनार्थंसंपादयेत् यथासंभवंवरणादीश्चवित्तानुसारेणशतमष्टषष्टिःपंचाशतषट्
त्रिषट्पंचविंशतिर्वागांदक्षिणार्थंस्ववर्णशृंगींरौप्यखुरींताम्रपृष्टींरत्नपुच्छांघंटाचामरस्वर्णपट्टिकादियुतांगां।
वावतारणाय तुलिकोपधानाद्युपस्कारयुतांशय्यांच अन्यदपियजमानस्यदातुमिष्टवस्तयत् तद्दानार्थमुपकल्पये

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6)

उत्स· युक्तं सर्वं वस्तु उपकल्पयेत् ततो गुरुर्द्वैस्त्विग्भिः । सर्वौषधीयुतजलेन स्नापितः शुक्लमाल्यांबरधरः शुक्लगंधानुलेपनः सपत्नीक
प॰ पुत्रपौत्रयुतो यजमानः साचार्यसऋत्विक् संपूर्णकलशहस्तो मंगलतूर्यनिस्वनो जायमाने भद्रं कर्णेभिः॰ इत्यादिवे
५ दघोषेण मंडपपूजनं कुर्यात् ततः पूर्वस्यां दिशि मंडपद्वारादहिर्हस्तमात्रं आश्वत्थं सुदंष्ट्रनामकं सुवर्णसदृशप्रभं।
माल्यपर्वतसहितं शाखांकितं तोरणं एह्येहि सुदंष्ट्रा तोरणा एनं यज्ञं रक्ष सर्वं विघ्नान्निवारय ॐ अग्निमीले॰ आवा।
ह्य॰ ऋग्वेदाधिष्टिताय सुदंष्ट्र तोरणाय नम इति गंधादिना प्रपूज्य॰ चंदनवस्त्रादिशोभितं कृत्वा राहुर्हस्य नीनत्र
न्यसेत् पूजयेच्च तत्रैकः कलशः स्थाप्यः तत्र विधिः महीद्यौरिति भूमिं स्पृशन् प्रार्थ्य॰ ओषधय इति यवान् क्षिपेत् आ
जिघ्रेति कलशं निधाय इमं मे इति जलमापूर्य गंधद्वारामिति गंधं या ओषधिरिति सर्वौषधीः कांडात्कांडादिति दूर्वाः
अश्वत्थेति पंचपल्लवान् स्योनापृथिवि॰ पंचसप्तमृदः याः फलिनीरिति फलं परिवाजपतिरिति पंचरत्नानि हिरण्यग
र्भेति हिरण्यं युवासुवासा इति रक्तसूत्रेणावेष्टयेत् पूर्णादर्विति धान्यपूर्णशरावं कलशोपरि निधाय तत्र ध्रुवमावाह्य पू। राम·
जयेत् ततः आचम्य ततो दक्षिणे औदुंबरं विकटाख्य भिन्नांजनसमं विंध्यपर्वतसहितं चक्रांकितं तोरणं एह्येहि विकट ५

(6A)

तोरणं एनं यज्ञं रक्ष सर्वविघ्नान्निवारय इषेत्वोर्ज्जेत्वेत्यावाह्य यजुर्वेदाधिष्ठिताय विकटतोरणाय नमः गंधादिना प्रपू
ज्य चंदनादिशोभितं कृत्वा तत्र सूर्यं मंगारकं च न्यसेत् पूजयेत् ततः पूर्ववत् कलशं स्थापयित्वा तत्र धरामावाह्य पूजयेत्
ततः आचम्य पश्चिमे द्वाःस्तंभं सुभीमाख्यं सिंदूरप्रभं गंधमादनपर्वतसहितं गदांकितं तोरणं एह्येहि सुभीमतोरणं एनं यज्ञं
रक्ष सर्वविघ्नान्निवारय अग्न आयाहीत्यावाह्य सामवेदाधिष्ठिताय सुभीमतोरणाय नमः गंधादिना प्रपूज्य चंदनादि।
शोभितं कृत्वा शुक्रं बुधं च तत्र न्यस्य पूजयेत् ततः पूर्ववत् कलशं निधाय तत्र वाक्पतिमावाह्य पूजयेत् ततउत्तरे द्वारं सुप्रभा
ख्यं शुद्धस्फटिकप्रभं हिमवत्पर्वतसहितम् पद्मांकितं तोरणं एह्येहि सुप्रभतोरणं एनं यज्ञं रक्ष सर्वविघ्नान्निवारय शन्नो
देवीत्यावाह्य अथर्ववेदाधिष्ठिताय सुप्रभतोरणाय नमः इति गंधादिना प्रपूज्य चंदनादिशोभितं कृत्वा सोमकेतु शनीं
स्तत्र न्यस्य पूजयेत् तत्र पूर्ववत् कलशं निधाय० तत्र विघ्नेशमावाह्य पूजयेत् ततः पूर्वे शाखाद्वये कलशद्वयं वहिर्दध्यस्त
त० भूषितं पूर्ववन्मंत्रेण स्थापयेत् प्रतिकलशं मंत्रावृत्तिः एवं तं कलशद्वये न्यस्य पूजयेत् कलशोपरि घृतेन तैलेन वा
दीपो देयः ततऋग्वेदिनो द्वौ द्वारपालौ अग्निमीले गंधादिना पूजयेत् एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधरामरे
शसंवीज्यमानोप्सरसां गणेन रक्षाध्वरं नो भगवन्नमस्ते ततः सांगं सपरिवारं सायुधं सशक्तिकमिंद्रं कल योरु परिआवा

(७)

उत्स० ह्यत्रातारमिंद्रमवितारमिंद्रꣳ हवेहवे सुहवꣳ शूरमिंद्रमह्वयामि० त्विंद्रः प्रपूज्य आशुः शिशानेति मंत्रेण पीतौ पताका
प० ध्वजौ उच्छ्रयेत् द्वारशाखयोर्धात्रे नमः विधात्रे नमः द्वारश्रियै नमः गणपतये नमः उपरि वास्तुपुरुषाय नमः अधः ततः
६ सहस्राक्षमैरावतसंस्थितं पीतं किरीटकुंडलधरं दक्षिणवामकरवज्रोत्पलमिंद्रं ध्यात्वा ततः इन्द्रः सुरपतिः श्रेष्ठो वज्र
हस्तो महाबलः शतयज्ञाधिपो देवस्तस्मै नित्यं नमो नमः ततो बलिः इंद्राय सांगाय सपरिवाराय सायुधाय सशक्तिका०।
य एतं माषभक्तबलिं समर्पयामीति बलिं दद्यात् ततः आचम्य आग्नेये गत्वा पूर्ववद्वेदिकं कलशं निधाय तत्र पुंडरीकं पू
जयित्वा अमृतं च गणं पूजयित्वा दीपो देयः छागस्थं रक्तं दक्षिणवामकरद्वये ध्वतशक्तिकं कमंडलु यज्ञोपवीतिनम
ग्निं ध्यात्वा ॐ एह्येहि सर्वामरहव्यवाह मुनिप्रवीरैरभितोभिजुष्ट तेजावता लोकगणेन सार्द्धं ममाध्वरं पाहि कवे नमः।
स्ते ततोग्निं सांगं सपरिवारं सायुधं सशक्तिकं कलशे आवाह्य त्वन्नो अग्ने तव देव० व्रते १ अग्निं गंधादिना प्रपूज्य
अग्निं दूतं० रक्तौ पताकौ ध्वजौ उच्छ्रयेत् आग्नेयः पुरुषो रक्तः सर्वदेवमयोऽव्ययः धूम्रकेतु रजोध्यक्षस्तस्मै नित्यं नमो
नमः अग्नये सांगेत्यादि एतं माषभक्तबलिं समर्पयामीति बलिं दद्यात् ततः दक्षिणे प्रतिद्वारशाखयोः पूर्ववत् क राम०
लशद्वयं निधाय वामनं दिग्गजं तत्र न्यस्य प्रपूज्य दीपदानं यजुर्वेदिनो द्वारपालौ इषेत्वोर्जे० गंधादिना प्रपूज्य ततो। ६

(7A)

माहिषारूढं धृतदंडपाशं दक्षिणवामकरद्वयम् कृष्णांजनचयोपमं अग्निसमलोचनं यमं ध्यात्वा॰ एह्येहि वैवस्व
तधर्मराज सर्वामरैरर्चित धर्ममूर्ते शुभाशुभानंदशुचामधिशाशिवायनः पाहि मखं नमस्ते सांगं यमं कलशयोरावा
ह्य यमाय त्वाङ्गिरस्वते॰ गंधादिना प्रपूज्य॰ आपं गोः कृष्णोपताकाध्वजौ उच्छ्रयेत् द्वारशाखयोर्वलायनमः स
वलायनमः द्वारश्रियेनमः उपरि गणपतयेनमः अधोवास्तुपुरुषायनमः ततो महिषमारूढं दंडहस्तं महावलं।
आवाहयामि यज्ञेस्मिन्पूजेयं प्रतिगृह्यतां यमाय सांगेसादि एतं माषभक्तवलिं समर्पयामीति वलिं॰ दद्यात् ततो नै
ऋत्यां पूर्ववदेकं कलशं निधाय कुमुदं दिग्गजं दुर्जयं च पूजयित्वा दीपो देयः तत्र निर्ऋतिं ध्यात्वा नरारूढं महाकायं ख
ड्गहस्तं महावलं नीलं राक्षसवेष्टितं पीताभरणभूषितं एह्येहि रक्षोगणनायकस्त्वं विशालवेतालपिशाचसंघैः ममा
ध्वरं पाहि पिशाचनाथ लोकेश्वरस्त्वं भगवन्नमस्ते ततः सांगादि निर्ऋतिमावाह्य असुन्वंतमयजमान ॰मस्तु गं।
धादिभिः पूजयित्वा मोषूणाइति नील पताकाध्वजावुच्छ्रयेत् निर्ऋतिं खड्गहस्तं च सर्वलोकैकपावनं आवाहयामि
यज्ञेस्मिन्पूजेयं प्रतिगृह्यतां सांगेसादि निर्ऋतये माषभक्तवलिं समर्पयामि वलिं दद्यात् ततः पश्चिमे प्रतिद्वारशाख
योः पूर्ववत् कलशौ निधाय अंजनाख्यं दिग्गजं तत्र न्यस्य प्रपूज्य दीपदानं ततः सामवेदिनौ द्वौ द्वारपालौ अग्न आया

(४)

उत्स॰ हीतिगंधादिभिः प्रपूज्य॰ ततो मकरस्थं पाशहस्तं शुक्लवर्णं किरीटधारिणं ध्यात्वा ॐ एह्येहि यादोगणवारिधीनांगणे
प॰ नपर्जन्यसह्याप्सरोभिः विद्याधरेन्द्रामरगीयमानपाहित्वमस्मान् भगवन्नमस्ते सांगादिवरुणं कलशयोरावाह्य तत्त्वा।
७ जामिब्रह्मणा॰ रिवः गंधादिभिः संपूज्य इमंमे तिश्वेतौ पताकाध्वजावुछ्रयेत् द्वारशाखयोर्जयायनमः विजयायनमः
द्वारश्रियै॰ उपरिगणेशा ॰ अधोवास्तुपुरुषायनमः ततः पाशहस्तंचवरुणमर्णामेणसापतिमीश्वरं आवाहयामि
यज्ञेस्मिन्पू॰ सांगेत्यादिएतंमाषभक्तवलिंसमर्पयामीतिवलिंदद्यात् ततः आचम्य वायव्यां॰ पूर्ववदेकं कलशं निधा।
यपुष्पदंतंदिग्गजंसिद्धार्थंचसंपूज्यदीपोदेयः ततः मृगाधिरूढं धूम्रवर्णं चित्रांवरधरंयुवानंवरंध्वजधरंदक्षिण।
वामहस्तद्वयंवायुंध्यात्वा ॐ एह्येहियज्ञेममरक्षणायमृगाधिरूढ सहसिद्धसंघैः प्राणाधिपः कालकवेसहायगृ
हाणपूजांभगवन्नमस्ते ततः सांगादिवायुमावाह्य आनोनियुद्भिःशतिनी॰ दानः गंधादिभिः संपूज्य॰ वायोयेते॰ धूम्रो
पताकाध्वजावुछ्रयेत् ततः वायुमाकाशगंचैवपवनंवेगवद्गति आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां अनाका
शेमहोजाश्वयश्चादृष्टिगतादिवि तस्मैपूज्यायजगतोवायवेहंनमामिते सांगेत्यादिएतंभाषभक्तवलिंसमर्पयामी॥ राम॰
तिवलिंदद्यात् ततः आचम्योत्तरेप्रति द्वारशाखयोः पूर्ववत् कलशौनिधाय॰ तत्रसार्वभौमदिग्गजं न्यस्यप्रपूज्यदीपो॥ ७

(8A)

देयः ततोथर्वे विद्वारपालौशन्नोदेवी॰ गंधादिभिः प्रपूज्य ततोनरयुतविमानस्थंकुंडलहारकेयूररुचिरांवरगदाधरद।
क्षिणावामभुजद्वयंमुकुटिनेमहोदरंमहाकायंहरितवर्णं कुवेरंध्यात्वा ॐ एह्येहियज्ञेश्वरयज्ञरक्षांविधत्स्वनक्षत्रगणेन
सार्द्धंसर्वौषधिभिः पितृभिःसहेवग्रहाणपू॰ सांगादिसोमंकलशायोरावाह्य वयर्ठ॰ सोमत्रतेतव॰ महि गंधादिभिःसंपूज्य
आप्यायस्वेतिश्वेतौपताकाध्वजौहरितौवाउच्छ्रयेत् उत्तरद्वारशाखयोःश्चंडायनमः प्रचंडायनमः द्वारश्रीयेनमः उप।
रिगणपतयेनमः अधोवास्तुपुरुषाय॰ ततःसर्वनक्षत्रमध्येतु सोमोराजाव्यवस्थितः तस्मैसोमायदेवायनक्षत्रपतयन
मः सांगेत्यादिसोमायेतंमाषभक्तवलिंसमर्पयामीतिवलिंदद्यात् आचम्य ईशान्यांपूर्ववत्कलशंनिधायतत्रसुप्रती
कंदिग्गजंमंगलंचतत्रन्यसेत् संपूज्यदीपोदयः ततःवृषारूढंदक्षिणावामहस्तयोर्वरत्रिशूलधरंत्रिनेत्रंशुक्लवर्णमिशा
नंध्यात्वा एह्येहिविश्वेश्वरविश्वनाथकपालखड्गांगधरेणसार्द्धं लोकेशयज्ञेश्वरयज्ञसिद्ध्यै गृहाण॰ सर्वाधिपोमहा
देवईशानःशुक्लईश्वरः शूलपाणिर्विरूपाक्षस्तस्मैनित्यंनमोनमः सागादिमीशमावाह्यतमीशानञ्जग॰स्तये॥ गं
धादिभिःप्रपूज्यश्वेतौसर्ववर्णौवापताकाध्वजावुच्छ्रयेत् तमीशानमितिमंत्रेण वृषस्कंधसमारूढंशूलहस्तंत्रिलोच
नं आवाहयामियज्ञेस्मिन् पूजेयंप्रतिगृह्यतां ततःसांगेत्यादिईशानाय एतंमाषभक्तवलिंसमर्पयामीतिवलिंदद्यात्।ए

(१)

उत्स० तःपूर्वेशानयोर्मध्ये ऊर्द्ध्वमुद्दिश्य पूर्ववत्कलशंनिधायतत्रब्रह्माणंपूजयेत् तद्यथा अक्षसूत्रकुशमुष्टिधरोर्ध्वाधोदक्षिणकरं
प० स्रुवकमंडलुधरोर्ध्वाधोवामकरद्वयं चतुर्मुखंश्मश्रुलंजटिलंलंबोदरंरक्तवर्णंब्रह्माणंध्यात्वा ॐएह्येहिसर्वाधिपतेसुरेंद्र
८ लोकेनसार्द्धंपितृदेवताभिः सर्वस्यधातास्यमितप्रभावोविशाध्वरंनःसततंशिवाय सांगादि० ब्रह्माणमावाह्य ब्रह्मजज्ञा
नंप्रथमंपुरस्तात्० विवः गंधादिनाप्रपूज्यतेनैवमंत्रेणरक्तोपताकाध्वजावुच्छ्रयेत् पद्मयोनिश्चतुर्मूर्त्तिर्वेदावासःपितामहः
यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मैनित्यंनमोनमः सांगेसादि एतं माषभक्तवलिंसमर्पयामीतिवलिंदद्यात् ततःआचम्यनिर्ऋति
वरुणयोर्मध्ये पूर्ववत्कलशंनिधाय ततःअधःअनंतशयनासीनंफणासप्तकमंडितं पद्मशंखधरोर्ध्वाधोदक्षिणकर
द्वयंनीलवर्णमनंतंध्यात्वा ॐएह्येहिपातालधरामरेंद्रनागांगनाकिंनरगीयमान रक्षोरगेंद्रामरलोकसंघैरनंतरक्षाध्व
रमस्मदीयं सांगादिअनंतमावाह्य आयंगौःपृश्नि० गंधादिभिःप्रपूज्य धूम्रौध्वजौपताकाध्वजावुच्छ्रयेत् योसावनं
तरूपेणब्रह्मांडंसचराचरं पुष्पवद्धारयेन्मूर्ध्नितस्मैनित्यंनमोनमः सांगेसादि अनंताय एतंमाषभक्तवलिंसमर्पया
मीतिवलिंदद्यात् ततःआचम्यमंडपमध्येचामरकिंकिणीयुतः षोडशहस्तदंडोवाद्वादशहस्तदीर्घस्त्रिहस्तविस्तारए। राम०
कहस्तविस्तारोवापंचवर्णोविचित्रोमहाध्वजोइन्द्रस्य० इसुच्छ्रयेत् तत्रब्रह्मजज्ञानमितिब्रह्माणंपूजयेत् ततोमं ८

(9A)

डपषोडशास्तंभेषुसर्वेभ्योदेवेभ्योनमः ततोवंशेषुकिंनरेभ्योनमः छद्येपन्नगेभ्योनमः ततोमंडपांतरपूर्वादिभागेकिंचि
द्भूमिमुपलिप्योपविश्य त्रैलोक्येयानिभूतानिस्थावराणिचराणिच ब्रह्मविष्णुशिवैःसार्द्धंरक्षांकुर्वंतुतानिचदेवदान
वगंधर्वायक्षराक्षसपन्नगाः ऋषयोमुनयोगावोदेवमातरएवच सर्वेममाध्वरेरक्षाप्रकुर्वंतुमुदान्विताः ब्रह्मावि।
ष्णुश्चरुद्रश्चक्षेत्रपालोगणैःसह रक्षंतुमंडपंसर्वेघ्नंतुरक्षांसिसर्वतः त्रैलोक्यस्थेभ्यस्थावरेभ्योनमः त्रैलोक्यस्थे
भ्यश्चरेभ्योनमः ब्रह्मणेभ्योनमः शिवाय० देवेभ्यो० दानवेभ्योनमः गंधर्वेभ्यो०यक्षेभ्यो०राक्षसेभ्यो०पन्नगेभ्यो०
ऋषिभ्योनमः मनुष्येभ्यो०गोभ्योनमः०देवमातृभ्यो० इतिसंपूज्य० पंचदशैकंवावलिंदद्यात् ॥इतिमंडपप्रतिष्ठा॥
अथवास्तुपूजनम्॥ ॥मंडपनैऋत्यकोणेवास्तुमंडपंकार्यं० चतुरंगुलोन्नतांहस्तमितांवेदिंविधाय आचम्यप्रा।
णानायम्य अद्येत्यादिवास्तुकर्माहंकरिष्ये ततःवास्तुमंडलचतुःकोणेषुशंकुचतुष्टयंईशानादिप्रदक्षिणक्रमेणा
रोपयेत् तत्रमंत्रः विशंतुभूतलेनागालोकपालाश्चसर्वदा मंडपेत्रावतिष्ठंतु आयुर्वलकराःसदा अनेनमंत्रेणआ
ग्नेयादिकोणेषु ततःशंकुनापार्श्वेरोपणक्रमेणवलिदानं अग्निभ्योप्यथसर्पेभ्योयेंवान्येतान्समाश्रिताः तेभ्यो।
वलिंप्रदास्यामिपुण्यमोदनमुत्तमं १ अनेनमंत्रेणआग्नेय्यांवलिंदत्वानैऋत्याधिपतिश्चैवनैऋत्यायेचराक्षसाः ते०।२

ॐ नमोवायुसर्पेभ्योयेचान्येतानसमाश्रिताः तेभ्यो०१३॥ रुद्रेभ्यश्चैवसर्पेभ्योयेचान्येतानूसमाश्रिताःतेभ्यो-१४। इतिक्रमे
णचतुःकोणेषुवलिंदद्यात् तन्मध्येकनकशलाकयारत्नेवास्जतफलपुष्पाणामन्यत्तमेवीरेखाः प्रागायताः उदक
संस्थाःकुर्यात् लक्ष्मीर्यशोवतीकांतासुप्रियाविमलाश्रिया सुभगासुमतीडान्वक्रमादेतेश्चनामभिः धान्याप्राणावि
शालाचस्थिराभद्राजयानिशा विरजाविभवाएतैर्नामभिश्चैवतत्क्रमात् उदग्राःप्राक्संस्था नवरेखाकृत्वाचतुःष
ष्ठितमंमंडलंभवति तत्रमध्यगंपदचतुष्टयमेकीकृत्य तत्कोणचतुष्टया द्बहिःकोणचतुष्टयेरेखाभिःपदान्युत्कृत्य ।
शिख्यादीनस्थापयेत् मंडलमध्येवास्तुपुरुषमावाहयेत् पूजयेच्च एह्येहिभगवन् वास्तोयज्ञेस्मिन्सर्वेसिद्धये जानु।
नीकूर्परेणशाक्तपिशाचान् आहुतयोः वास्तुपुरुषं——पंचोपचारैःपूजयेत् ततः शिखिप्रभृतिपंचचत्वारिंशद्देवताः
स्थापयेत्त स्वस्वपदेषुशुक्लतंडुलैः तत्रईशानपददक्षिणार्द्धेशिखिनंॐशिखिने नमः शिखिनंआ० इतिसर्वत्र तद्द
क्षिणासार्द्धपदेपर्जन्यं २ तद्दक्षिणपदद्वयेजयंतं ३ तद्दक्षिणपदद्वयेकुलिशायुधं ४ तद्दक्षिणपदद्वयेसूर्यं ५ राम·
तद्दक्षिणपदद्वयेसत्यं ६ तद्दक्षिणपदद्वयेभृशं ७ तद्दक्षिणाग्नेयपदार्द्धेआकाशं ८ तत्पश्चिमार्द्धेवायुं ९ तत्पश्चिमा ९

(10A)

सार्धपदेपूषणं १० तत्पश्चिमपदद्वयेवितथं ११ तदग्रतःपदद्वयेग्रहक्षतं १२ तदग्रतःपदद्वयेयमं १३ तदग्रतःपद-
द्वयेगंधर्वं १४ तत्पश्चिमसार्द्धपदेभृंगराजं १५ तत्पश्चिमनैर्ऋत्यपदार्द्धेमृगं १६ तदुत्तरार्द्धेपितॄन् १७ तदुत्तरसार्द्ध
पदेदौवारिकं १८ तदुत्तरपदद्वयेसुग्रीवं १९ तदुत्तरपदद्वयेपुष्पदंतं २० तदुत्तरपदद्वयेवरुणं २१ तदुत्तरपदद्वयेअ
सुरं २२ तदुत्तरसार्द्धपदेशोषं २३ तदुत्तरवायव्यपदार्द्धेपापं २४ तत्प्राक्पदार्द्धेरोगं २५ तत्प्राक्सार्धपदेअहिं २६ त
त्प्राक्पदद्वयेमुख्यं २७ तत्प्राक्पदद्वयेभल्लाटं २८ तत्प्राक्पदद्वयेसोमं २९ तत्प्राक्पदद्वयेसर्पं० ३० तत्प्राक्पदद्व
येदितिं ३१ तत्प्रागर्द्धपदेअदितिं ३२ मध्यपदेषु ईशानपदोत्तरार्द्धेअपो वाऽग्नेनमः ३३ ईशानपददक्षिणार्द्धेआप
वत्सायनमः ३४ तद्दक्षिणपदद्वयेअर्यम्णेनमः ३५ तद्दक्षिणेआग्नेयपदार्द्धेसावित्रायनमः ३६ आग्नेयपदपश्चिमार्द्धेस
वित्रे० ३७ तत्पश्चिमपदद्वयेविवस्वतेनमः ३८ तत्पश्चिमेनैर्ऋत्यपदार्द्धेविबुधाधिपायनमः ३९ तदुत्तरार्द्धेजयंताय
नमः ४० तदुत्तरपदद्वयेमित्रायनमः ४१ तदुत्तरेवायव्यपदार्द्धेराजयक्ष्मणेनमः ४२ तत्पूर्वार्द्धेरुद्रायनमः ४३ तत्पूर्वे
पदद्वयेपृथ्वीधरायनमः ४४ मध्यमपदचतुष्केब्रह्मणेनमः ४५ ततोमंडपाद्बहिः ईशानादिषु चरक्यैनमः स्कंदाय
नमः विदार्यैनमः अर्यम्णेनमः पूतनायैनमः जृंभकायनमः पाप राक्षस्यैनमः पिलिपिच्छायनमः पूर्वादिषुइंद्रादीन्



न्यसेत् तत्रमंडलादीशानेकलशंस्थापयेत् कलशोक्तविधिना इतिवास्तुपूजा
ततोयजमानःसाचार्यऋत्विक् प्रक्षालितपादपाणिराचांतःप्राग्द्वारेणमंडपं
प्रविश्यदक्षिणाद्वारेपश्चिमगतउपविश्यभोगुर्वादयोयथाविहितंकर्मकुरुध्व
मितिसविनयंप्रार्थयेत् ततःआचार्योवेद्याउपरिफलपुष्पोपशोभितंपंचवर्णं।
वितानंकंदद्यात् ततोवेद्यामुपविश्यवेदिसंमृज्यमंगलतूर्यध्वनौप्रवर्तमा
नेउक्तरीत्यावारुणंमंडलंलिखेत् ततःपूर्वेकुंडेऋग्वेदिनौहोतारौउपविशेतां
तत्रैकोब्रह्मासचपश्चिममुखः अपरोहोमकर्तासचोदङ्मुखः ततोदक्षि
णकुंडेयजुर्वेदिनौ तत्रब्रह्माउदङ्मुखः अपरोहोमकर्तापूर्वमुखः पश्चि
मकुंडेसामवेदिनौएवमेवोत्तरकुंडेअथर्ववेदिनौ ततःकुंडसंन्निधौचतत
द्वेदविदोहोतृवत् द्वौद्वौजापकावुपवेशयेत् आचार्यश्चस्वकुंडेप्राङ्मुख
उपविशेत् ततोगुरुःस्वकुंडेस्वगृह्योक्तविधिनाग्निंस्थापयेत् तेपिचकुर्युः॥

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com